# श्री भालचंद्र–गणेशस्तोत्रम्

## (प्रथम)

## विष्णु–शिव–शिवा–सूर्य–ब्रह्मदेवदिपंचेश्वरैः स्तुतम्

## (संस्कृत श्लोकाः)

**।। श्रीगणेशाय ब्रह्मणस्पतयेनमः श्री पंचकन्यापतये भालचंद्रायनमः योगिनीपुष्टि मोहिनी संजीवनी–सरस्वतीभ्यः पंचेशकन्याभ्यो नमः ।।**

ब्रह्माद्याऊचुः । नमस्ते गणनाथाय विघ्नानांपतये नमः । अनाथानां सुनाथाय नमो विघ्न निवारण।।१।। भक्तेभ्यः सर्वदात्रे ते निराकाराय साक्षिणे । अभेयायाप्रतर्क्याय हेरंबाय नमोनमः ।।२।। गजाननाय देवाय शूर्पकर्णाय ते नमः । महोदारात्य सर्वे षामादिपूज्याय वै नमः ।।३।। सर्वादये महादात्रे सर्वपूज्याय वै नमः । सर्वभाव स्थितायैव ढुंढिराजाय ते नमः ।।४।। स्वानंदवासिने तुभ्यं योगशांति मयाय च । योगिभ्यो योगदात्रे वै योगानां पतये नमः ।।५।। सुष्टिकर्त्रे च पात्रे च सृष्टिकर्त्रे नमो नमः । गणेशाय गुणानां वै चालकाय नमो नमः ।।६।। आत्मनेऽनात्मने चैव कारणांना प्रकाशिने । ब्रह्मेशाय सदानाथ देवपालकरुपिणे ।।७।। निवारय महाविघ्नं सहसा समुपस्थितं । ग्रसिष्यति न चेदंड मस्मान् वै नात्र संशयः ।।८।। त्वदीय पादपद्मस्य वयं दासा न संशयः । मरिष्यामो यदा नाथ यशस्तव गतं तदा ।।९।। अधुना रक्ष देवेश न वयं द्रष्टुमुग्रकं । क्षमा गच्छति नः प्राणा रक्ष विघ्नेशं रक्षभोः ।।१०।। एवं संस्तुवतां तेषां पुरः सोपि महापुमान् । गणेशाकाररूपेणं भभूव नृपसत्तम ।।११।। ततस्तेतं प्रणेमुश्च पूजयामासुरादरात् । मानसीं स्वसुतां तस्मै ददुः सर्वे शिवादयः ।।१२।। सरस्वतीं ददौ ब्रह्मा विष्णुः पुष्टिं च मानसी । योगिनीं शंकरश्चैव मोहिनी जगदंबिका ।।१३।। संजीवनी ददौ तस्मै भानुः सर्व प्रियंकरः । एवं संपूज्य विघ्नेशं प्रणतास्ते महीपते ।।१४।। इति श्रीमन्मौद्गलोक्तंपंचदेवैः स्तुतं श्रीपंचकन्यापति–भालचन्द्र गणेशस्तोत्रं संपूर्णम् ।। श्री भालचन्द्रगणेशार्पणमस्तु ।।